0649CH03

## तृतीयः पाठः

# शब्दपरिचयः-III



एतत् किम्?
एतत् खनित्रम् अस्ति?
श्रमिका खनित्रं चालयति।




तत् किम्?
तत् विश्रामगृहम् अस्ति।
किम् अत्र भित्तिकम् अस्ति?
अत्र भित्तिकं न अस्ति।



एते के?
एते अङ्गुलीयके स्तः।
सुवर्णकारः अङ्गुलीयके रचयति।





ते के?
ते बसयाने स्तः।
ते बसयाने कुत्र गच्छतः?
ते रेलस्थानकं गच्छतः।



© NCERT not to be republished





एतानि कानि?
एतानि करवस्त्राणि सन्ति।
किम् एतानि पुराणानि?
न, एतानि तु नूतनानि।




तानि कानि?
तानि कदलीफलानि सन्ति।
किं तानि मधुराणि?
आम्, तानि मधुराणि पोषकाणि च।



## शब्दार्थाः

| | | | |
|---|---|---|---|
| **एतत्** (नपुं.) | – | यह | it |
| **विश्रामगृहम्** | – | विश्रामालय | rest house |
| **अत्र** | – | यहाँ | here |
| **भित्तिकम्** | – | घेरा, दीवार | fence, wall |
| **खनित्रम्** | – | कुदाल, खन्ती | digging axe |
| **श्रमिका** | – | मजदूरनी | female labour |
| **चालयति** | – | चलाती है | moves/uses |
| **एते** | – | ये दोनों | these two |
| **बसयाने** | – | दो बसें | two buses |





© NCERT not to be republished

| | | | |
|---|---|---|---|
| **कुत्र** | – | कहाँ | where |
| **गच्छतः** | – | जा रहे हैं/जा रही हैं | are going |
| **रेलस्थानकम्** | – | स्टेशन | railway station |
| **अङ्गुलीयके** | – | दो अँगूठियाँ | two rings |
| **स्तः** | – | हैं | are |
| **सुवर्णकारः** | – | सुनार/सोनार | goldsmith |
| **एतानि** | – | ये (नपुं., बहु.) | these |
| **कदलीफलानि** | – | केले के फल | bananas |
| **मधुराणि** | – | मीठे/अच्छे | sweet |
| **पोषकाणि** | – | पोषक | naurishment |
| **करवस्त्राणि** | – | रुमाल | handkerchiefs |
| **पुराणानि** | – | पुराने | old |
| **नूतनानि** | – | नये | new |

## अभ्यासः



**1. (क) उच्चारणं कुरुत।**

| | | | |
|---|---|---|---|
| फलम् | गृहम् | पात्रम् | पुष्पम् |
| द्वारम् | विमानम् | कमलम् | पुस्तकम् |
| सूत्रम् | छत्रम् | भवनम् | जलम् |





© NCERT not to be republished



## ( ख ) चित्राणि दृष्ट्वा पदानि उच्चारयत।



पर्णम्




क्रीडनकम्




नारिकेलम्



सङ्गणकम्



वातायनम्



सोपानम्



उद्यानम्



उपनेत्रम्



कङ्कतम्

## 2. ( क ) वर्णसंयोजनं कृत्वा पदं कोष्ठके लिखत–

यथा– प् + अ + र् + ण् + अ + म् = पर्णम्

ख् + अ + न् + इ + त् + र् + अ + म् =

प् + उ + र् + आ + ण् + आ + न् + इ =



© NCERT not to be republished

प् + ओ + ष् + अ + क् + आ + ण् + इ = ____________

क् + अ + ङ् + क् + अ + त् + अ + म् = ____________

**( ख ) अधोलिखितानां पदानां वर्णविच्छेदं कुरुत-**

**यथा-** व्यजनम् = व् + य् + अ + ज् + अ + न् + अ + म्

पुस्तकम् = ..........................................................................


भित्तिकम् = ..........................................................................

नूतनानि = ..........................................................................


वातायनम् = ..........................................................................


उपनेत्रम् = ..........................................................................

**3. चित्राणि दृष्ट्वा संस्कृतपदानि लिखत-**


....................


....................


....................


....................


....................


....................



© NCERT not to be republished




**4. चित्रं दृष्ट्वा उत्तरं लिखत-**



**यथा-** किं पतति?

..............................



मयूरौ किं कुरुतः।

..............................



एते के स्तः?

..............................




बालिकाः किं कुर्वन्ति?

..............................



कानि विकसन्ति?

..............................



© NCERT not to be republished

**5. निर्देशानुसारं वाक्यानि रचयत-**

| | | | |
|---|---|---|---|
| **यथा-** एतत् पतति। | (बहुवचने) | - | **एतानि पतन्ति।** |
| (क) एते पर्णे स्तः। | (बहुवचने) | - | .............................. |
| (ख) मयूरः नृत्यति। | (बहुवचने) | - | .............................. |
| (ग) एतानि यानानि। | (द्विवचने) | - | .............................. |
| (घ) छात्रे लिखतः। | (बहुवचने) | - | .............................. |
| (ङ) नारिकेलं पतति। | (द्विवचने) | - | .............................. |

**6. उचितपदानि संयोज्य वाक्यानि रचयत-**

| | |
|---|---|
| कोकिले | विकसति |
| पवनः | नृत्यन्ति |
| पुष्पम् | उत्पतति |
| खगः | वहति |
| मयूराः | गर्जन्ति |
| सिंहाः | कूजतः |



© NCERT not to be republished